

# एकादश: पाठ: । मनस: स्वच्छता ।

'श्यामची आई' इति पाण्डुरंग सदाशिव साने (साने गुरुजी) महोदयेन मराठीभाषया विरचितं पुस्तकम्। अस्मिन् पुस्तके तस्य आत्मकथनपरा: कथा: सन्ति। एता: स्मरणकथा: बालकानां कृते बोधपरा: संस्कारक्षमा: मातृस्नेहवर्धका: च। श्याम: प्रतिरात्रं स्वमित्रेभ्य: स्वजीवनाधारिता: स्मृतिकथा: कथयति। संस्कृतानुवादद्वारा अस्य आदर्शभूतस्य पुस्तकस्य परिचय: कारित: **डॉ. मञ्जूषा कुलकर्णी** महाभागया। तस्मात् पुस्तकात् अयं प्रसङ्ग:।




''बाल्यादेव द्विवारं स्नानं करोमि स्म अहम्।'' श्यामेन कथा आरब्धा। ''द्विवारं स्नानस्य अभ्यास: उत्तम: एव। रात्रौ निद्राया: पूर्वं स्नानं कुर्म: चेत् शरीरं स्वच्छं, सतेज:, लघुभारमिव च भासते। निद्राया: पूर्वं वयं प्रार्थनां कुर्म:, एतत् भवति मनस: स्नानम्। यदि शरीरं मन: च स्वच्छे तर्हि निद्रा उत्तमा भवति।



एकदा प्रतिदिनमिव खेलित्वा अहं गृहम् आगत्य स्नानार्थं गतवान्। सायङ्कालस्य स्नानार्थम् अधिकस्य जलस्य आवश्यकता न भवति। स्नानं समाप्य मया उक्तम्, ''अम्ब, शुष्कय मे अङ्गम्। जलं समाप्तं, सत्वरं शुष्कय मे अङ्गम्'' इति उच्चै: अवदम् अहम्। सायङ्काले मे माता स्वशाटिकया एव मम शरीरं मार्जयति स्म।

माता आगता, मम अङ्गं मार्जितवती आज्ञां च दत्तवती ''देवपूजार्थं पुष्पाणि आनय, श्याम'' इति। ''मम पादतलौ आर्द्रौ स्त:। मृत्तिकया मलिनौ भविष्यत:। अत: मम पादतलौ अपि स्वच्छीकुरु।'' इति ''पादतलौ आर्द्रौ स्त: तर्हि किं जातं रे श्याम ? अधुना केन वस्त्रेण मार्जयामि ?'' ''अम्ब, तव शाटिकाञ्चलं पाषाणे विस्तारय।'' ''श्याम, अतीव हठस्वभाव: असि।'' इति उक्त्वा मात्रा शाटिकाञ्चलं विस्तारितम्। अहं चरणौ तदुपरि स्थापयित्वा शुष्कौ कारयित्वा निर्गतवान्। मातु: वस्त्रम् आर्द्रम् अभवत्।

तस्मिन् समये तया शाटिकापरिवर्तनं कर्तुं न शक्यते इत्यपि मया न चिन्तितम्। परन्तु पुत्रचरणौ मलिनौ न भवेताम्, पुत्रेच्छा पूर्णा भवेत् एतदर्थं तया स्वशाटिका आर्द्रा कृता। माता पुत्रार्थं किं किं न करोति, किं किं न सहते, किं किं न समर्पयति? अहं गृहस्य अन्तर्भागं गतवान्, पूजार्थं पुष्पाणि स्थापितवान्। माता दीपं गृहीत्वा आगतवती उक्तवती च, ''श्याम, चरणौ मलिनौ न भवत: अत: यथा प्रयतसे तथैव मन: मलिनं न भवतु एतदर्थम् अपि प्रयतस्व। प्रार्थयस्व देवं शुद्धबुद्ध्यर्थम्।''

भो मित्राणि, कियन्त: मधुरा: शब्दा:! पावित्र्यार्थं स्वच्छतायै वयं प्रतिदिनं प्रयतामहे। वस्त्रस्वच्छतार्थं क्षालनचूर्णम् अस्ति, शरीरार्थं चन्दनफेनकानि सन्ति। शरीरं वस्त्राणि च मलिनानि न भवन्तु अत: सर्वे प्रयत्नं कुर्वन्ति। अपि वयं मनस: स्वच्छतायै प्रयतामहे ?''

## भाषाभ्यासः



**१. एकवाक्येन उत्तरत।**

१) निद्रा कदा उत्तमा भवति?  २) स्नानेन किं भवति?  ३) कदा प्रार्थनां वदामः?
४) माता श्यामस्य चरणौ केन मार्जयति?  ५) वयं प्रतिदिनं किमर्थं प्रयतामहे ?

**२. माध्यमभाषया लिखत।** मनसः स्वच्छताविषये माता श्यामं कथं बोधितवती?

**३. अ) सन्धिविग्रहं कुरुत ।** १. लघुभारमिव २. इत्यपि ३. इतोऽपि ४. तथैव ५. कदापि

**आ) वर्णविग्रहं कुरुत।** १. पादतलौ  २. स्नानस्य

**इ) विशेषण-विशेष्य-सम्बन्धः।**

| | | | | |
|---|---|---|---|---|
| विशेष्यम् | पादतलौ | अभ्यासः | मनः | शरीरम् |
| विशेषणम् | सतेजः | मलिनम् | आर्द्रौ | उत्तमः |

**४. सूचनानुसारं परिवर्तनं कुरुत।**

१. अहं द्विवारं स्नानं करोमि स्म। ('स्म' निष्कासयत)
२. वयं प्रतिदिनं प्रयतामहे। (एकवचनं कुरुत)

**५. समानार्थकशब्दयुग्मं चिनुत।** शरीरम्, मृत्तिका, चरणौ, मित्रम्, मनः, मृद्, सुहृद्, चित्तम्, पादौ, देहः

**६. विरुद्धार्थकं शब्दं लिखत।** पवित्रम्, शुष्कम्, नीचैः, स्वच्छम्, अधिकम्, सत्वरम्।

**७. उपपदविभक्तिं योजयत।**

१. -------पूर्वं वयं प्रार्थनां वदामः। (निद्रायाः/निद्रायै)
२. एकदा नित्यमिव खेलित्वा अहं ------ आगतः। (गृहे/गृहम्)

**८. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. मात्रा स्वशाटिका आर्द्रा कृता यतः .....।
अ) सा वर्षायां क्लिन्ना।
आ) तेन पुत्रेच्छा पूर्णा भवेत्।

**पठत अवगच्छत !**  **विश्वं विसर्गस्य।**

● हंसश्श्वेतः बकश्श्वेतः को भेदो बकहंसयोः।
नीरक्षीरविवेके तु हंसो हंसो बको बकः ॥

| | | |
|---|---|---|
| हंसः | हंसश् | शरूपः विसर्गः |
| बकः | बकश् | |
| कः | को | ओकाररूपः विसर्गः |
| भेदः | भेदो | |
| हंसः | हंसो | |
| बकः | बको | |

● त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वम् इन्द्रस्त्वम् अग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवस्स्वरोम् ॥

| | | |
|---|---|---|
| विष्णुः | विष्णुस् | सरूपः विसर्गः |
| रुद्रः | रुद्रस् | |
| अग्निः | अग्निस् | |
| वायुः | वायुस् | |
| सूर्यः | सूर्यस् | |
| चन्द्रमाः | चन्द्रमास् | |